श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे

॥ मरकतपद्धतिः एकोनविंशी ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्री रङ्गनाथदिव्यमणिपादुकाभ्यां नमः

॥ मरकतपद्धतिः एकोनविंशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

वन्दे गारुत्मतीं वृत्त्या मणिस्तोमैश्च पादुकाम्।
यया नित्यं तुळस्येव हरितत्त्वं प्रकाश्यते॥ 19.1॥

सविलासगतेषु रङ्गभर्तुः
त्वदधीनेषु बहिष्कृतो गरुत्मान्।
अधिगच्छति निर्वृतिं कथञ्चित्
निजरत्नैस्त्वयि पादुके! निविष्टैः॥ 19.2॥

समये मणिपादुके! मुरारेः
मुहुरन्तःपुरमुग्धचेटिकास्ते।
हरितान् हरिदश्मनां मयूखान्
तुळसीपल्लवशङ्कया क्षिपन्ति॥ 19.3॥

हरितः सहसा हरिन्मणीनां
प्रभया रङ्गनरेन्द्रपादरक्षे!।
तुळसीदलसम्पदं दधाति
त्वयि भक्तैर्निहितः प्रसूनराशिः॥ 19.4॥

प्रसादयन्ती मणिपादुके! त्वं
विक्षेपयोगेन विहारवेलाम्।

हरिन्मनोज्ञा हरिकान्तिसिन्धोः
सन्दृश्यसे शैवलमञ्जरीव ॥ **19.5** ॥

बध्नासि रङ्गेश्वरपादरक्षे !
हरिन्मणीनां प्रभया स्फुरन्त्या।
चूडापदेषु श्रुतिसुन्दरीणां
माङ्गल्यदूर्वाङ्कुरमाल्यपङ्क्तिम् ॥ **19.6** ॥

अच्छेद्यरश्मिनियतैर्घटिता हरिद्भिः
सद्वर्त्मना गतिमती मणिपादरक्षे !।
सन्दृश्यसे सवितृमण्डलमध्यभाजो
रङ्गेश्वरस्य रथसम्पदिवापरा त्वम् ॥ **19.7** ॥

श्यामायमाननिगमान्तवनोपकण्ठाः
स्थाने पदावनि ! हरिन्मणयस्त्वदीयाः।
पर्यन्तशाद्वलवतीं प्रथयन्ति नित्यं
नारायणस्य रुचिरां नखरश्मिगङ्गाम् ॥ **19.8** ॥

उद्दिश्य कामपि गतिं मणिपादरक्षे !
रङ्गेश्वरस्य चरणे विनिवेशितात्मा।
प्रायो हरिन्मणिरुचा दृढभक्तिबन्धा
प्रादुष्करोति भवती तुळसीवनानि ॥ **19.9** ॥

सेवार्थमागतवतां त्रिदशेश्वराणां
चूडामणिप्रकरशालिषु मौळिषु त्वम्।
संवर्तयस्यसुरमर्दनपादरक्षे !
स्वेनाश्मगर्भमहसा शुकपङ्क्तिशोभाम् ॥ **19.10** ॥

दरपरिणतदूर्वा वल्लरीनिर्विशेषैः
मरकतशकलानां मांसलैरंशुजालैः।

पशुपतिविधृता त्वं तस्य पाणौ निषण्णं
मधुरिपुपदरक्षे ! वञ्चयस्येणशाबम्॥ 19.11 ॥

हरिचरणसरोजन्यासयोग्यं भवत्याः
प्रगुणमभिलषन्त्यो वर्णलाभं तुळस्यः।
प्रतिदिनमुपहारैः पादुके ! तावकानां
मरकतशकलानामाश्रयन्ते मयूखान्॥ 19.12 ॥

हरितमणिमयूखैरञ्चिताध्यात्मगन्धैः
दिशसि चरणरक्षे ! जातकौतूहला त्वम्।
दनुजमथनलीलादारिकाणामुदारां
दमनकदळपङ्क्तिं देवि ! मौलौ श्रुतीनाम्॥ 19.13 ॥

अधिगतबहुशाखैरश्मगर्भप्रसूतैः
मधुरिपुपदरक्षे ! मेचकैरंशुजालैः।
अनितरशरणानां नूनमारण्यकानां
किमपि जनयसि त्वं कीचकारण्यदुर्गम्॥ 19.14 ॥

प्रचुरनिगमशाखां पादुके ! रङ्गिणस्त्वां
चरणनखमयूखैश्चारुपुष्पानुबन्धाम्।
मरकतदळरम्यां मन्महे सञ्चरन्तीं
कनकसरिदनूपे काञ्चिदुद्यानलक्ष्मीम्॥ 19.15 ॥

नखकिरणनिकायैर्नित्यमाविर्मृणाले
महितरसविशेषे मेचकैरंशुभिस्ते।
परिकलयसि रम्यां पादुके ! रङ्गभर्तुः
पदकमलसमीपे पद्मिनीपत्रपङ्क्तिम्॥ 19.16 ॥

अनिमिषयुवतीनामार्तनादोपशान्त्यै
त्वयि विनिहितपादे लीलया रङ्गनाथे।

दधति चरणरक्षे ! दैत्यसौधानि नूनं
मरकतरुचिभिस्ते मङ्क्षु दूर्वाङ्कुराणि ॥ **19.17** ॥

विपुलतममहोभिर्वीतदोषानुषङ्गं
विलसदुपरिनैल्यं देवि ! विष्णोः पदं तत्।
पृथुमरकतदृश्यां प्राप्य पादावनि ! त्वां
प्रकटयति समन्तात् सम्प्रयोगं हरिद्भिः ॥ **19.18** ॥

पद्माभूम्योः प्रणयसरणिर्यत्र पर्यायहीना
यत्संसर्गादनघचरिताः पादुके ! कामचाराः।
तारासक्तं तमिह तरुणं प्रीणयन्ते जरत्यो
नित्यश्यामास्तव मरकतैर्नूनमाम्नायवाचः ॥ **19.19** ॥

स्थलकमलिनीव काचित् चरणावनि ! भासि कमलवासिन्याः।
यन्मरकतदळमध्ये यः कश्चिदसौ समीक्ष्यते शौरिः ॥ **19.20** ॥

॥ इति श्रीकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य
श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु
श्रीरङ्गनाथपादुकासहस्रे मरकतपद्धतिः एकोनविंशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥